Topic 21 प्रकृतिभाव संधि ५, सामान्य प्रकृतिभाव

सम्बुद्धौ शाकल्यस्येतावनार्षे । [99]

सम्बुद्धिनिमित्तक ओकारो वा प्रगृह्योऽवैदिके इतौ-परे । विष्णो इति । विष्णइति । विष्णविति ।

मय उञो वो वा ।

मयः परस्य उञो वो वा स्यादचि । किम्वुक्तम्, किमु उक्तम् ।

इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ।

पदान्ता इको ह्रस्वा वा स्युरसवर्णेऽचि ।
ह्रस्वविधानसामर्थ्यान्न स्वर सन्धिः ।
चक्रि अत्र, चक्र्यत्र । पदान्ता किम्-गौर्यौ ।

असवर्ण स्वर परे होने पर पदान्त दीर्घ-ई, ऊ, ॠ और ॡ के स्थान पर विकल्प से क्रमशः ह्रस्व इ, उ, ऋ और ऌ आदेश होते हैं और ह्रस्वादेश होने पर प्राप्त सन्धि-कार्य नहीं होता ।

असवर्ण स्वर परे होने पर पदान्त ह्रस्व इ, उ, ऋ या ऌ को विकल्प से प्रकृतिभाव होता है अर्थात् उसको निमित्त मानकर सन्धि कार्य नहीं होता ।

अचो रहाभ्यां द्वे ।

अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्तः । [99] गौर्य्यौ ।

ऋत्यकः ।

ऋति परे पदान्ता अकः प्राग्वद् वा । ब्रह्म ऋषिः, ब्रह्मर्षिः ।
पदान्ताः किम् - आर्च्छत् ।